# द्वितीय सत्रीय परीक्षा

## आदर्श-प्रश्न पत्रम्

( 2021-2022 )

कक्षा-दशमी

विषय-संस्कृतम्

समय : होरात्रयम् अङ्का : 50

प्रश्न 1. अधोलिखित अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत- (1× 5 = 5)

अथ परिव्राजकैः सह देशाद्देशं पर्यटन् शंकरः काश्याम् गोविन्दपादाचार्येभ्यः वेदान्तविद्याम् अधीतवान्। अनन्तरं मुख्यानाम् उपनिषदां, ब्रह्मसूत्राणां, श्रीमद्भागवतगीतायाश्च भाष्याणि अरचयत्। अनेन विरचितानि बहूनि स्तोत्रकाव्यानि अपि सन्ति येषु भजगोविन्दस्तोत्रम् अतीव लोकप्रियमस्ति।

1. एकपदेन उत्तरत-

(क) शंकरः कुत्र वेदान्तविद्याम् अधीतवान् ?

(ख) अतीव लोकप्रियं स्तोत्रं किम् ?

2. पूर्णवाक्येन उत्तरत-

केषां ग्रन्थानां भाष्याणि शंकरः अरचयत् ?

3. निर्देशानुसारम् उत्तरत-

(क) 'अप्रियम्' इत्यस्य विलोमपदं अत्र किम् प्रयुक्तम् ?

(ख) 'उपनिषदाम्' इत्यत्र का विभक्ति : ?



Downloaded from cclchapter.com

प्रश्न 2. मञ्जूषात : पदानि विचित्य रिक्तस्थानानि पूरियत्वा स्व-अनुजस्य कृते पत्रं लिखत- ½ ×10 = 5

पित्रोः, त्वम्, गणितविषये, छात्रावासतः, अनुजः, आशिषः, सिध्यन्ति शोभनः, तव, प्राप्ताः।

प्रिय ........ सोमेश!

सस्नेहं ..........

ह्यः अहं ............ पत्रं प्राप्तवान्।

................. परीक्षापरिणामः............अस्ति, परं ......... भवता न्यूनाः

अङ्काः.............. इति सखेदं मया अधीतम्।

.................. प्रतिदिनं प्रातः काले उत्थाय गणितस्य अभ्यासं कुरू, गणिताध्यापकं च पुनः पुनः प्रश्नान् पृच्छ। अभ्यासेन एव सर्वाणि कार्याणि.......।

................ चरणयोः सादरं प्रणामः।

प्रश्न 3. अधोलिखितविषयेषु एकं विषयम् अधिकृत्य लघुनिबन्धलेखनं कुरुत- हिमाचलप्रदेशः, मम प्रियं मित्रम्, दीपावली (5 × 1 = 5)

प्रश्न 4. सन्धिम्/सन्धिविच्छेदं कुरुत - ( केषाञ्चन त्रयाणाम् )(1×3 = 3)

परैर्न, तल्लीनः, जगदीशः, कोऽपि, योजकः + तत्र, रामः + च।

प्रश्न 5. अधोलिखितानां केषाञ्चन पञ्चवाक्यानां प्रकृति-प्रत्ययं पृथक् कृत्वा/मेलनं कृत्वा लिखत- (1×5=5)

(क) शिमलानगरे .............. उत्सवः वर्तते। ( धर्म + ठक्)



Downloaded from cclchapter.com

(ख) ............. गीतं गायति। (गायक+ टाप्)

(ग) ............ सवर्त्र पूज्यते। (गुण + मतुप्)

(घ) सर्वे भवन्तु .................. । (सुखिन:)

(ङ) अग्ने: .............शीतकाले रोचते। (उष्णता)

(च) तस्य भार्या ........... अस्त्रि। (रूपवती)

**प्रश्न 6. अधोलिखितपदानां पद-परिचय देयम्-( केषाञ्चन चतुर्णाम् )** (1×4 = 4)

वयम्, बलस्य, गच्छन्तु, रमया, तिष्ठ, पठसि, तस्मिन्, अलिख:।

**प्रश्न 7. समयं संस्कृतेन लिखत ( केषाञ्चन चतुर्णाम् )** (1×4 = 4)

11 : 30 = ................ ।

12 : 45 = ............ ।

8 : 15 .......... ।

2 : 00 = ................. ।

4 : 30 = ............ ।

7 : 00 = ......... ।

**प्रश्न 8. अधोलिखितेषु वाक्येषु समासम् अधितकृत्य समस्तपदं/विग्रहपदं वा विधीयन्ताम्। ( द्वयो: एव )** (1×2 = 2)

(क) राम: कदापि ............ न वदति। (असत्यम्)

(ख) ............. धर्मप्रदां वाचं परित्यजति। (विमूढा धी: यस्य स:)

(ग) ............... नदी वसति। (ग्रामस्य समीपे)

(घ) ........... गृहं गतौ। (मातापितरौ)



Downloaded from cclchapter.com

प्रश्न 9. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् उत्तरत-
(केषाञ्चन चतुर्णाम्) (1×4 = 4)

वनस्य दृश्यम् समीपे एवैका नदी वहति। एक: सिंह: सुखेन विश्राम्यते तदैव एक: वानर: आगत्य तस्य पुच्छं धुनाति। क्रुद्ध: सिंह: तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ:।

1. एकपदेन उत्तरत-
   (क) वनस्य समीपे का वहति ?
   (ख) सुखेन क: विश्राम्यते ?
2. पूर्णवाक्येन उत्तरत-
   वानर: कस्य पुच्छं धुनाति ?
3. निर्देशानुसारं उत्तरत-
   (क) 'क्रुद्ध: सिंह:' इत्यत्र विशेषणपदं किम् ?
   (ख) 'आगत्य' इत्यत्र प्रकृति-प्रत्ययं पृथक्कुरुत।

प्रश्न 10. अधोलिखितं गद्यांशं हिन्दीभाषायां लिखत- (3×1=3)

सर्वथा अयुक्तमेतत् यन्मयूर-हंस-कोकिल-चक्रवाक्-शुक-सारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य कराल-वक्त्रस्याभिषेकार्थं सर्वे सज्जा:। पूर्णं दिनं यावत् निद्रायमाण: एष: कथमस्मान् रक्षिष्यति।

अथवा

न्यायाधीशेन पुनस्तौ घटनाया: विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शव: प्रावारकम् अपसार्य न्यायाधीशमभिवाद्य



Downloaded from cclchapter.com

निवेदितवान्-मान्यवर। एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व।

**प्रश्न 11. अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् उत्तरत-** 1 × 4 = 4

(केषाञ्चन चतुर्णाम्)

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

1. एकपदेन उत्तरत-

(क) कः प्रथमः धर्मः ?

(ख) एतत् केषां वचः ?

2. पूर्णवाक्येन उत्तरत-

विशेषतः किं रक्षेत् ?

3. निर्देशानुसारं उत्तरत-

(क) "प्रथमः धर्मः" इत्यत्र विशेष्यपदं किम् ?

(ख) "तस्माद् सदाचारं रक्षेत्" इत्यत्र क्रियापदं किम् ?

**प्रश्न 12. अधोलिखितं पद्यं हिन्दीभाषायां लिखत-** 2 × 1= 2

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

अथवा

यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।

जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः।।



Downloaded from cclchapter.com

प्रश्न 13. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत- 1× 2 = 2

(कयोश्चित् द्वयोः)

(क) मयूरस्य नृत्यं प्रकृतेः आराधना।

(ख) धैर्यवान् लोके परिभवं न प्राप्नोति।

(ग) पुत्रं द्रष्टुं सः प्रस्थितः

प्रश्न 14. विलोम्पदानि मेलयत-(केषाञ्चन चतुर्णाम्) $\left(\frac{1}{2}\times4=2\right)$

| | |
|---|---|
| पक्वः | कोमला |
| विमूढधीः | अपक्वः |
| कातरः | सुधीः |
| कृतज्ञता | अकातरः |
| परुषा | कृतघ्नता |



Downloaded from cclchapter.com